# श्रीसत्यध्यानतीर्थाष्टकम्

सत्यज्ञानकराब्जोत्थान् सत्यप्रज्ञोपदेशकान् ।
सत्यध्यानमुनीन् वन्दे शास्त्रार्थज्ञानसिद्धये ॥१॥

शास्त्रप्रवचनासक्तान् सदा विद्यार्थिवत्सलान् ।
सत्यध्यानमुनीन् वन्दे शास्त्रव्याख्यानसिद्धये ॥२॥

प्रतिवादीभपञ्चास्यान् मध्वसिद्धान्तदीपकान् ।
सत्यध्यानमुनीन् वन्दे वादकौशलसिद्धये ॥३॥

सूत्रभेदपरत्वस्य साधकान् ग्रन्थतो भुवि ।
सत्यध्यानमुनीन् वन्दे सूत्रनैजार्थवित्तये ॥४॥

जीवेशभेदपरतां श्रुतेः साधयतो मुहुः ।
सत्यध्यानमुनीन् वन्दे श्रौततात्पर्यवित्तये ॥५॥

गीताप्रतिपदार्थानां संग्रहं तन्वतो मुदा ।
सत्यध्यानमुनीन् वन्दे गीतार्थज्ञानसिद्धये ॥६॥

चन्द्रिकामण्डनद्वारा व्यासराजोक्तसाधकान् ।
सत्यध्यानमुनीन् वन्दे चन्द्रिकाज्ञानसिद्धये ॥७॥

हेमताराान्नवित्तादिदानशौण्डांश्च निस्स्पृहान् ।
सत्यध्यानमुनीन् वन्दे त्वौदार्यगुणसिद्धये ॥८॥

सत्यात्मयतिना प्रोक्तं सत्यध्यानाष्टकं त्विदम् ।
यः पठेत् शृणुयाद्वापि सिद्धिः सर्वापि तस्य हि ॥९॥

॥ इति श्रीसत्यध्यानतीर्थाष्टकम् ॥